# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – अचार्य: (SEM-4)** **प्रश्नपत्रम् – 3** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.C.5.4.11** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –01/04/2019 सन्दर्भग्रन्थः – ब्रह्मवैवर्तपुराणम् – प्रकृतिखण्डः 1-67 अध्यायाः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 कश्चिदेकस्य सप्रसङ्गं व्याख्या कार्या। 05**

(1) गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती।
सावित्री वै सृष्टिविद्यौ प्रकृतिः पञ्चधा स्मृता ॥

(2) नित्यं सरस्वतीतोये यः स्नात्वा मुण्डयेन्नरः।
न गर्भवासं कुरुते पुनरेव स मानवः ॥

(3) भगीरथस्तस्य पुत्रो महाभागवतः सुधीः।
वैष्णवा विष्णुभक्तश्च गुणवानजरामरः ॥

**प्रश्नः-2 एकस्य सविस्तरं लिख्यताम्। 10**

(1) पुराणं पञ्चलक्षणम् समीक्षताम्।

(2) सरस्वतीपूजाविधानम् ग्रन्थोक्तदिशा लिखत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 कश्चिदेकस्य सप्रसङ्गं व्याख्या कार्या। 05**

(1) कपिलस्य तपः स्थानं पुण्यक्षेत्रं च भारते।
पश्चिमोदधिपूर्वे च मलयस्य च पश्चिमे ॥

(2) शिवस्तत्वं समाकर्ण्य तत्त्वज्ञान विशारदः।
ययौ स्वयं च समरं स्वगणैः सह नारद ॥

(3) कार्तिके तुलसीदानं करोति हरये च यः।
युगं पत्रप्रमाणं च मोदते हरिमन्दिरे ॥

**प्रश्नः-4 एकस्योत्तरं लिखत। 10**

(1) तुलसीमहिमा ग्रन्थोक्तदिशा वर्णयत।

(2) सत्यवान् सावित्री आख्यानम्।

(3) श्रीकृष्णलीलावर्णनम् ग्रन्थोक्तदिशा लिखत।

## तृतीयान्विति: (Unit-3)

**प्रश्नः-5 कश्चिदेकस्य सप्रसङ्गं व्याख्या कार्या।** **05**

(1) गवां प्रसूः सा सुरभिदक्षिणा यज्ञकामिनी।
क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च॥

(2) नारायणप्रिया सा च वरा वैकुण्ठवासिनी।
वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी॥

**प्रश्नः-6 एकं सविस्तरं लिख्यताम्।** **10**

(1) लक्ष्मीवर्णनम् ग्रन्थोक्तदिशा वर्णयत।

(2) नरकवर्णनम्।

(3) पुण्यकर्मफलानि।

**प्रश्नः-7 कश्चिदेकस्य सप्रसङ्गं व्याख्या कार्या।** **05**

(1) पितृमातृगुरुश्चापि भक्तिहीनो न पालयेत्।
वाचाऽपि ताडयेत्तांश्च स कृतघ्नः इति स्मृतः॥

(2) यथा सप्त च वारा वै तिथयः षोडश स्मृताः।
दिवारात्र्यश्च पक्षौ द्वौ मासो वर्षं च निर्मितम्॥

**प्रश्नः-8 एकं सविस्तरं लिख्यताम्।** **10**

(1) विष्णुस्वरूपवर्णनम्।

(2) राधा-पूजनोपक्रमः।

(3) समाधिना कृता देवीस्तुतिः।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) प्रकृति कति गुणात्मस्वरूपा?

(2) पुराणस्य कति लक्षणानि?

(3) कृतिः कस्य वाचकः?

(4) का देवी वीणापुस्तकधारिणी?

(5) प्रतिमङ्गलवारे का पूजिता?

(6) काण्वशाखौक्तपद्धतौ कस्याः पूजनम्?

(7) गुरुशापात् कः हतविद्या बभूव?

(8) कस्मिन् युगे धर्मः पूर्णो भविष्यति?

(9) कतिभिः प्रहरैः रात्रिः प्रोक्ता?

(10) पुण्यदा पापहर्त्री का?

(11) गङ्गा कस्य देवस्य शिरोगता?

(12) कति पुराणानि?

(13) कः धर्मराजः?

(14) कीदृशाः विप्राः शिवलोकं यान्ति?

(15) श्रीरामनवमी कस्मिन् मासे आयाति?